# ॥ श्रीचतुर्विंशत्यवतारस्तोत्रम् ॥

.. shrIchaturviMshatyavatArastotram ..

sanskritdocuments.org

July 25, 2016

# Document Information

Text title : chaturviMshatyavatArastotram
File name : chaturviMshatyavatArastotram.itx
Category :
Location : doc_vishhnu
Author :
Language : Sanskrit
Subject : philosophy/hinduism/religion
Transliterated by : Dinesh Agarwal dinesh.garghouse at gmail.com
Proofread by : Dinesh Agarwal, KSR, Psa Easwaran
Translated by :
Description/comments : brihatastotraratnakar 464
Source :
Acknowledge-Permission:
Latest update : May 17, 2015
Send corrections to : Sanskrit@cheerful.com
Site access : http://sanskritdocuments.org

# ॥ श्रीचतुर्विंशत्यवतारस्तोत्रम् ॥

श्रीगणेशाय नमः ।
पातालगं क्षितितलं सुरवृन्दपाता हत्वाऽऽदिदैत्यमुदधेर्निदधौ जलोर्ध्वम् ।
उद्धृत्य चातनुत यस्तनुतो यजूंषि तं सूकरं प्रथमप्रथमं नमामि ॥ १॥ var तं शङ्करं
स्वायम्भुवं मनुमपाच्च भुवं समस्तां भूत्वा तदीयतनयातनयोऽथ हत्वा ॥
यः स्वात्मजैः सुरगणैरसुरव्रजं तं यज्ञं द्वितीयमभवाय भजेऽद्वितीयम् ॥ २॥

प्रादुर्बभूव भवदुर्बलचित्तवृत्तीन् ज्ञानोपदेशरहितानुपदेष्टुकामः ।
यो देववन्द्यचरणो ननु देवहूत्यां वन्देऽवगाहकपिशं कपिलं तृतीयम् ॥ ३॥

यः सूनुकामुकमसूनुपरोधयन्तं सन्तोषयन् स्वजनकं स्वजनार्तिहात्रिम् ।
जज्ञे विधूतभवभीरवधूतवेषो दत्तो भवप्रभवदुःखहरोऽस्तु तुर्यः ॥ ४॥

सङ्कल्पमात्रकरणाद्गतकल्पनष्टं गूढं स्वतत्त्वनिगमं सुगमं करिष्यन् ।
धातुर्विचारचतुरोऽजनि यश्चतुर्धा सेवस्व पञ्चममपञ्चशरं कुमारम् ॥ ५॥

सत्कारमर्हति सतामपकारकोऽपीत्येवंविधामृषिगिरं विशदां विध्यास्यन् ।
योऽशेषदोषसदने मदनेऽदयिष्ट नारायणो विजयदो जयतात् स षष्ठः ॥ ६॥

यः केशवेऽकृतरतिं किल शैशवेऽपि दृष्ट्वा स्वदुःखहरणं शरणं तदेव ।
तस्मै सुनीतितनयाय नयान्विताय नित्यं ध्रुवाय वरदं वरयेऽश्वसंख्यम् ॥ ७॥

किं वेनमुत्पथगतं पुपुवे न भूमिं किं दुग्धरूपमथ सारमदुग्ध यो न ।
तं वै हिताय जगतां विहितावतारं वन्देऽष्टमं पृथुमहं पृथुलप्रतापम् ॥ ८॥

पूर्वं निजाचरणतो गृहिणामपूर्वं धर्मं जनाय निदिदेश जनान्तरज्ञः ।
योऽन्ते तथैव विरजस्तमसां विरज्यन्नत्यर्षभोऽस्तु नवमो नवसिद्धिदः सः ॥ ९॥

निद्रान्वितस्य मुखतो हि चतुर्मुखस्य स्रस्ता जले प्रतिददेऽप्रितमः श्रुतीर्यः ।
हत्वा तुरङ्गवदनं चतुरं रणे तं सौख्येहया किल भजे दशमं हयास्यम् ॥ १०॥

सत्यव्रताय निजभक्तिरताय नित्यं गुह्यं पुरा विविदिषुः स्वपुराणतत्त्वम् ।
योऽकालजे प्रलयकालजले व्यहार्षीदेकादशो जगति मे गतिरस्तु मत्स्यः ॥ ११॥

पृष्ठेन मन्दरममन्दभरं गिरिं यः क्षीरोदधावमरदैत्यकृते दधार ।
निःश्वासनर्तिततरङ्गसुरङ्गलुब्धः स द्वादशोऽस्तु कुदशोपशमाय कूर्मः ॥ १२॥

सर्वं जगद्धरिमयं जगतीति वाक्यं तथ्यं विधातुमथ चित्रतनूं विधाय ।

स्तम्भादजायत सदा यततां दुरापः सोऽस्तु त्रियुक्तदशमः शमदो नृसिंहः ॥
१३॥

वात्सल्यमात्मपुरुषेषु पुरुप्रतापः सन्दर्शयन्नविरतं निरतं स्वभक्तौ ।
ग्राहादमोचयदमोघबलो गजेन्द्रं भूत्यै हरिर्मनुमितोऽस्त्वमितोपमः सः ॥ १४॥

सर्वस्वमेव बलयेऽर्पयते स्वमेष प्रत्यर्पयत्तदपरं न तदर्हमग्र्यम् ।
लोकत्रये किमपि वस्तु विलोकमानः श्रिवामनो वसतु पञ्चदशो मनोऽब्जे ॥ १५॥

पृष्टान्निगूढविषयान् सुविषण्णचित्ते जाते विधातरि विधातृसुतैः सुविज्ञैः ।
उद्धूय सुष्ठुतरमुत्तरयाञ्चकार स्यात् षोडशः परमहंसगतिः स हंसः ॥ १६॥

आविर्बभूव भुवि भूवलयं प्रपातुं यः सज्जनेषु किल कल्पपलाशिकल्पः ।
दुष्टव्रजस्य दहने दहनोऽद्वितीयस्तं त्वां मनुं पुरुषसप्तदशं मनुष्व ॥ १७॥

योऽर्थाय विष्णुरुदघेरुदभूत् सुराणां नानाविधामयविनाशविधानविज्ञः ।
पीयूषयूषपरिपूर्णघटं गृहीत्वा धन्वन्तरिः सुखकरोऽस्तु करोनविंशः ॥ १८॥

राजन्यकं प्रवरराजगुणैर्विहीनं गर्वात्स्वधर्मपरधर्मविचारशून्यम् ।
योऽनेकवारमवधीदवधीरितस्तमेकोनविंशमवबुध्यति को न रामम् ॥ १९॥

पित्र्यं नियोगमतिदीर्घवियोगदायि सम्मानयन् मनुसमा व्यनयद्वनेषु ।
यः स्वीयरक्षणकृते विहितक्षणस्तं श्रीराममाश्रयवरं श्रय चित्त विंशम् ॥ २०॥

सम्पीडितां मनुजपैर्दनुजस्वभावैरुज्जीवयन् वसुमतीं वसुदेवगेहे ।
आविर्बभूव जनतापरितापहृत् स कृष्णोऽस्तु मेऽपि गदहा गदयैकविंशः ॥ २१॥

कालेन नष्टधिषणान् प्रबलेन वीक्ष्य लोकान् पराशरमुनेः शरणेऽवतीर्णः ।
भक्तप्रियः श्रुतिगणं बहुधा व्यभंक्त व्यासोऽस्तु मे शिवकरः करनेत्रसंख्यः ॥
२२॥

लोके मखादिमिषतस्त्वसुखादिबीजां व्याप्तां प्रभूतकरणेऽमितभूतहिंसाम् ।
यो मूलतः किल विमूलयितुं प्रजज्ञे चित्ते त्रिनेत्रकलनं कलयामि बुद्धम् ॥ २३॥

प्राप्तेषु सत्सु तनुतां प्रचुरेष्वसत्सु धर्मे तिरोहितवति प्रसृते त्वधर्मे ।
जज्ञेऽथ विष्णुयशसो निलये यशस्वी कल्की प्रसिद्धचरितोऽवतु सिद्धसंख्यः ॥
२४॥

॥ इति श्री चतुर्विंशत्यवतारस्तोत्रं सम्पूर्णम् ॥

This stotram praises the 24 important incarnations
of Vishnu as described in Srimad Bhagavatam
Canto-sarga 1 chapter-adhyAya 3 and

Canto 2 chapter 7
with some variations.

<◌ःॡ>

Encoded by Dinesh Agarwal dinesh.garghouse at gmail.com
Proofread by Dinesh Agarwal, K S Ramachandran, PSA Easwaran

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

.. shrIchaturviMshatyavatArastotram ..
was typeset on July 25, 2016

Please send corrections to *sanskrit@cheerful.com*